# Shri Valli Sahasranama Stotra

# શ્રીવલ્લીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : vallIsahasranAmastotram

File name : vallIsahasranAmastotra.itx

Category : sahasranAma, subrahmanya, stotra, vyAsa

Location : doc_devii

Author : Vyasa (Skanda Purana - Shankara Samhita)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : Bhagavati Stutimanjari (Mahaperiyaval Trust)

Latest update : October 19, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીવલ્લીસહસ્રનામસ્તોત્રમ્

(સ્કાન્દે શઙ્કરસંહિતાતઃ)

બ્રહ્મોવાચ -

શ઼ૃણુ નારદ મદ્વત્સ વલ્લીનામ્નાં સહસ્રકમ્ ।
સ્કન્દક્રીડાવિનોદાદિબોધકં પરમાદ્ભુતમ્ ॥ ૧॥

મુનિરસ્મ્યહમેવાસ્ય છન્દોઽનુષ્ટુપ્ પ્રકીર્તિતમ્ ।
વલ્લીદેવી દેવતા સ્યાત્ વ્રાં વ્રીં વ્રૂં બીજશક્ત્યપિ ॥ ૨॥

કીલકં ચ તથા ન્યસ્ય વ્રાં ઇત્યાદ્યૈઃ ષડઙ્ગકમ્ ।

ૐ અસ્ય શ્રી વલ્લીસહસ્રનામ સ્તોત્ર મન્ત્રસ્ય ભગવાન્ શ્રીબ્રહ્મા ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીવલ્લીદેવી દેવતા । વ્રાં બીજમ્ । વ્રીં શક્તિઃ ।
વ્રૂં કીલકમ્ । શ્રીસ્કન્દપતિવ્રતા ભગવતી શ્રીવલ્લીદેવી
પ્રીત્યર્થં સહસ્રનામજપે વિનિયોગઃ ॥

॥ અથ કરન્યાસઃ ॥

વ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
વ્રીં તર્જનીભ્યાં નમઃ ।
વ્રૂં મધ્યમાભ્યાં નમઃ ।
વ્રૈં અનામિકાભ્યાં નમઃ ।
વ્રૌં કનિષ્ઠાભ્યાં નમઃ ।
વ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ ઇતિ કરન્યાસઃ ॥

॥ અથ હૃદયાદિષડઙ્ગ ન્યાસઃ ॥

વ્રાં હૃદયાય નમઃ ।
વ્રીં શિરસે સ્વાહા ।
વ્રૂં શિખાયૈ વષટ્ ।

વ્રૈં કવચાય હુમ્ ।
વ્રૌં નેત્રત્રયાય વૌષટ્ ।
વ્રઃ અસ્ત્રાય ફટ્ ॥

॥ ઇતિ હૃદયાદિષડઙ્ગ ન્યાસઃ ॥

તતઃ સઞ્ચિન્તયેદ્દેવીં વલ્લીં સ્કન્દપતિવ્રતામ્ ॥ ૩॥

શ્યામાં શ્યામાલકાન્તાં દ્રુતકનકમણિ પ્રસ્ફુરદ્દિવ્યભૂષાં
    ગુઞ્જામાલાભિરામાં શિવમુનિતનયાં કાનનેન્દ્રાભિમાન્યામ્ ।
વામે હસ્તે ચ પદ્મં તદિતરકરવરં લમ્બિતં સન્દધાનાં
    સંસ્થાં સેનાનિદક્ષે સમુદમપિ મહાવલ્લિદેવીં ભજેઽહમ્ ॥ ૪॥

ઇત્યેવં ચિન્તયિત્વાઽમ્બાં મનસાઽભ્યર્ચ્ય સાદરમ્ ।
પઠેન્નામસહસ્રં તત્ શ્રૂયતાં સ્તોત્રમુત્તમમ્ ॥ ૫॥

ૐ વલ્લી વલ્લીશ્વરી વલ્લીબહ્વા વલ્લીનિભાકૃતિઃ ।
વૈકુણ્ઠાક્ષિસમુદ્ભૂતા વિષ્ણુસંવર્ધિતા વરા ॥ ૬॥

વારિજાક્ષા વારિજાસ્યા વામા વામેતરાશ્રિતા ।
વન્યા વનભવા વન્દ્યા વનજા વનજાસના ॥ ૭॥

વનવાસપ્રિયા વાદવિમુખા વીરવન્દિતા ।
વામાઙ્ગા વામનયના વલયાદિવિભૂષણા ॥ ૮॥

વનરાજસુતા વીરા વીણાવાદવિદૂષિણી ।
વીણાધરા વૈણિકર્ષિશ્રુતસ્કન્દકથા વધૂઃ ॥ ૯॥

શિવઙ્કરી શિવમુનિતનયા હરિણોદ્ભવા ।
હરીન્દ્રવિનુતા હાનિહીના હરિણલોચના ॥ ૧૦॥

હરિણાઙ્ગમુખી હારધરા હરજકામિની ।
હરસ્નુષા હરાધિક્યવાદિની હાનિવર્જિતા ॥ ૧૧॥

ઇષ્ટદા ચેભસમ્ભીતા ચેભવક્ત્રાન્તકપ્રિયા ।
ઇન્દ્રેશ્વરી ચેન્દ્રનુતા ચેન્દિરાતનયાર્ચિતા ॥ ૧૨॥

ઇન્દ્રાદિમોહિની ચેષ્ટા ચેભેન્દ્રમુખદેવરા ।
સર્વાર્થદાત્રી સર્વેશી સર્વલોકાભિવન્દિતા ॥ ૧૩॥

સદ્ગુણા સકલા સાધ્વી સ્વાધીનપતિરવ્યયા ।

સ્વયંવૃતપતિઃ સ્વસ્થા સુખદા સુખદાયિની ॥ ૧૪॥

સુબ્રહ્મણ્યસખી સુભ્રૂઃ સુબ્રહ્મણ્યમનસ્વિની ।
સુબ્રહ્મણ્યાઙ્કનિલયા સુબ્રહ્મણ્યવિહારિણી ॥ ૧૫॥

સુરીડ્રીતા સુરાનન્દા સુધાસારા સુધાપ્રિયા ।
સૌધસ્થા સૌમ્યવદના સ્વામિની સ્વામિકામિની ॥ ૧૬॥

સ્વામ્યદ્રિનિલયા સ્વામ્યહીના સામપરાયણા ।
સામવેદપ્રિયા સારા સારસ્થા સારવાદિની ॥ ૧૭॥

સરલા સઙ્ઘવિમુખા સઙ્ગીતાલાપનોત્સુકા ।
સારરૂપા સતી સૌમ્યા સોમજા સુમનોહરા ॥ ૧૮॥

સુષ્ઠુપ્રયુક્તા સુષ્ઠૂક્તિઃ સુષ્ઠુવેષા સુરારિહા ।
સૌદામિનીનિભા સુરપુરન્ધ્ર્યુદ્ગીતવૈભવા ॥ ૧૯॥

સમ્પત્કરી સદાતુષ્ટા સાધુકૃત્યા સનાતના ।
પ્રિયઙ્ગુપાલિની પ્રીતા પ્રિયઙ્ગુ મુદિતાન્તરા ॥ ૨૦॥

પ્રિયઙ્ગુદીપસમ્પ્રીતા પ્રિયઙ્ગુકલિકાધરા ।
પ્રિયઙ્ગુવનમધ્યસ્થા પ્રિયઙ્ગુગુડભક્ષિણી ॥ ૨૧॥

પ્રિયઙ્ગુવનસન્દૃષ્ટગુહા પ્રચ્છન્નગામિની ।
પ્રેયસી પ્રેય આશ્લિષ્ટા પ્રયસીજ્ઞાતસત્કૃતિઃ ॥ ૨૨॥

પ્રેયસ્યુક્તગુહોદન્તા પ્રેયસ્યા વનગામિની ।
પ્રેયોવિમોહિની પ્રેયઃકૃતપુષ્પેષુવિગ્રહા ॥ ૨૩॥

પીતામ્બર પ્રિયસુતા પીતામ્બરધરા પ્રિયા ।
પુષ્પિણી પુષ્પસુષમા પુષ્પિતા પુષ્પગન્ધિની ॥ ૨૪॥

પુલિન્દિની પુલિન્દેષ્ટા પુલિન્દાધિપવર્ધિતા ।
પુલિન્દવિદ્યાકુશલા પુલિન્દજનસંવૃતા ॥ ૨૫॥

પુલિન્દજાતા વનિતા પુલિન્દકુલદેવતા ।
પુરુહૂતનુતા પુણ્યા પુણ્યલભ્યાઽપુરાતના ॥ ૨૬॥

પૂજ્યા પૂર્ણકલાઽપૂર્વા પૌર્ણમીયજનપ્રિયા ।
બાલા બાલલતા બાહુયુગલા બાહુપઙ્કજા ॥ ૨૭॥

બલા બલવતી બિલ્વપ્રિયા બિલ્વદલાર્ચિતા ।
બાહુલેયપ્રિયા બિમ્બ ફલોષ્ઠા બિરુદોન્નતા ॥ ૨૮॥

બિલોત્તારિત વીરેન્દ્રા બલાઢ્યા બાલદોષહા ।
લવલીકુઞ્જસમ્ભૂતા લવલીગિરિસંસ્થિતા ॥ ૨૯॥

લાવણ્યવિગ્રહા લીલા સુન્દરી લલિતા લતા ।
લતોદ્ભવા લતાનન્દા લતાકારા લતાતનુઃ ॥ ૩૦॥

લતાક્રીડા લતોત્સાહા લતાડોલાવિહારિણી ।
લાલિતા લાલિતગુહા લલના લલનાપ્રિયા ॥ ૩૧॥

લુબ્ધપુત્રી લુબ્ધવંશ્યા લુબ્ધવેષા લતાનિભા ।
લાકિની લોકસમ્પૂજ્યા લોકત્રયવિનોદિની ॥ ૩૨॥

લોભહીના લાભકર્ત્રી લાક્ષારક્તપદામ્બુજા ।
લમ્બવામેતરકરા લબ્ધામ્ભોજકરેતરા ॥ ૩૩ ।
મૃગી મૃગસુતા મૃગ્યા મૃગયાસક્તમાનસા ।
મૃગાક્ષી માર્ગિતગુહા માર્ગક્રીડિતવલ્લભા ॥ ૩૪॥

સરલદ્રુકૃતાવાસા સરલાયિતષણ્મુખા ।
સરોવિહારરસિકા સરસ્તીરેભભીમરા ॥ ૩૫॥

સરસીરુહસઙ્કાશા સમાના સમનાગતા ॥

શબરી શબરીરાધ્યા શબરેન્દ્રવિવર્ધિતા ॥ ૩૬॥

શમ્બારારાતિસહજા શામ્બરી શામ્બરીમયા ।
શક્તિઃ શક્તિકરી શક્તિતનયેષ્ટા શરાસના ॥ ૩૭॥

શરોદ્ભવપ્રિયા શિઞ્જન્મણિભૂષા શિવસ્નુષા ।
સનિર્બન્ધસખીપૃષ્ટરહઃ કેલિનતાનના ॥ ૩૮ ।
દન્તક્ષતોહિતસ્કન્દલીલા ચૈવ સ્મરાનુજા ।
સ્મરારાધ્યા સ્મરારાતિસ્નુષા સ્મરસતીડિતા ॥ ૩૯॥

સુદતી સુમતિઃ સ્વર્ણા સ્વર્ણાભા સ્વર્ણદીપ્રિયા ।
વિનાયકાનુજસખી ચાનાયકપિતામહા ॥ ૪૦॥

પ્રિયમાતામહાદ્રીશા પિતૃસ્વસ્રેયકામિની ।
પ્રિયમાતુલમૈનાકા સપત્નીજનનીધરા ॥ ૪૧॥

સપત્નીન્દ્રસુતા દેવરાજસોદરસમ્ભવા ।
વિવધાનેકભૃદ્ભક્ત સઙ્ઘસંસ્તુતવૈભવા ॥ ૪૨॥

વિશ્વેશ્વરી વિશ્વવન્દ્યા વિરિઞ્ચિમુખસન્નુતા ।
વાતપ્રમીભવા વાયુવિનુતા વાયુસારથિઃ ॥ ૪૩॥

વાજિવાહા વજ્રભૂષા વજ્રાદ્યાયુધમણ્ડિતા ।
વિનતા વિનતાપૂજ્યા વિનતાનન્દનેડિતા ॥ ૪૪॥

વીરાસનગતા વીતિહોત્રાભા વીરસેવિતા ।
વિશેષશોભા વૈશ્યેષ્ટા વૈવસ્વતભયઙ્કરી ॥ ૪૫॥

કામેશી કામિની કામ્યા કમલા કમલાપ્રિયા ।
કમલાક્ષાક્ષિસમ્ભૂતા કુમૌદા કુમુદોદ્ભવા ॥ ૪૬॥

કુરઙ્ગનેત્રા કુમુદવલ્લી કુઙ્કુમશોભિતા ।
ગુઞ્જાહારધરા ગુઞ્જામણિભૂષા કુમારગા ॥ ૪૭॥

કુમારપત્ની કૌમારીરૂપિણી કુક્કુટધ્વજા ।
કુક્કુટારાવમુદિતા કુક્કુટધ્વજમેદુરા ॥ ૪૮॥

કુક્કુટાજિપ્રિયા કેલિકરા કૈલાસવાસિની ।
કૈલાસવાસિતનયકલત્રં કેશવાત્મજા ॥ ૪૯॥

કિરાતતનયા કીર્તિદાયિની કીરવાદિની ।
કિરાતકી કિરાતેડ્યા કિરાતાધિપવન્દિતા ॥ ૫૦॥

કીલકીલિતભક્તેડ્યા કલિહીના કલીશ્વરી ।
કાર્તસ્વરસમચ્છાયા કાર્તવીર્યસુપૂજિતા ॥ ૫૧॥

કાકપક્ષધરા કેકિવાહા કેકિવિહારિણી ।
કૃકવાકુપતાકાઢ્યા કૃકવાકુધરા કૃશા ॥ ૫૨॥

કૃશાઙ્ગી કૃષ્ણસહજપૂજિતા કૃષ્ણ વન્દિતા ।
કલ્યાણાદ્રિકૃતાવાસા કલ્યાણાયાતષણ્મુખા ॥ ૫૩॥

કલ્યાણી કન્યકા કન્યા કમનીયા કલાવતી ।
કારુણ્યવિગ્રહા કાન્તા કાન્તક્રીડારતોત્સવા ॥ ૫૪॥

કાવેરીતીરગા કાર્તસ્વરાભા કામિતાર્થદા ।
વિવધાસહમાનાસ્યા વિવધોત્સાહિતાનના ॥ ૫૫॥

વીરાવેશકરી વીર્યા વીર્યદા વીર્યવર્ધિની ॥

વીરભદ્રા વીરનવશતસાહસ્રસેવિતા ॥ ૫૬॥

વિશાખકામિની વિદ્યાધરા વિદ્યાધરાર્ચિતા ।
શૂર્પકારાતિસહજા શૂર્પકર્ણાનુજાઙ્ગના ॥ ૫૭॥

શૂર્પહોત્રી શૂર્પણખાસહોદરકુલાન્તકા ।
શુણ્ડાલભીતા શુણ્ડાલમસ્તકાભસ્તનદ્વયા ॥ ૫૮॥

શુણ્ડાસમોરુયુગલા શુદ્ધા શુભ્રા શુચિસ્મિતા ।
શ્રુતા શ્રુતપ્રિયાલાપા શ્રુતિગીતા શિખિપ્રિયા ॥ ૫૯॥

શિખિધ્વજા શિખિગતા શિખિનૃત્તપ્રિયા શિવા ।
શિવલિઙ્ગાર્ચનપરા શિવલાસ્યેક્ષણોત્સુકા ॥ ૬૦॥

શિવાકારાન્તરા શિષ્ટા શિવાદેશાનુચારિણી ।
શિવસ્થાનગતા શિષ્યશિવકામા શિવાદ્વયા ॥ ૬૧॥

શિવતાપસસમ્ભૂતા શિવતત્ત્વાવબોધિકા ।
શૃઙ્ગારરસસર્વસ્વા શૃઙ્ગારરસવારિધિઃ ॥ ૬૨॥

શૃઙ્ગારયોનિસહજા શૃઙ્ગબેરપુરાશ્રિતા ।
શ્રિતાભીષ્ટપ્રદા શ્રીડ્યા શ્રીજા શ્રીમન્ત્રવાદિની ॥ ૬૩॥

શ્રીવિદ્યા શ્રીપરા શ્રીશા શ્રીમયી શ્રીગિરિસ્થિતા ।
શોણાધરા શોભનાઙ્ગી શોભના શોભનપ્રદા ॥ ૬૪॥

શેષહીના શેષપૂજ્યા શેષતલ્પસમુદ્ભવા ।
શૂરસેના શૂરપદ્મકુલધૂમપતાકિકા ॥ ૬૫॥

શૂન્યાપાયા શૂન્યકટિઃ શૂન્યસિંહાસનસ્થિતા ।
શૂન્યલિઙ્ગા શૂન્ય શૂન્યા શૌરિજા શૌર્યવર્ધિની ॥ ૬૬॥

શરાનેકસ્યૂતકાયભક્તસઙ્ઘાશ્રિતાલયા ।
શશ્વદ્વૈવધિકસ્તુત્યા શરણ્યા શરણપ્રદા ॥ ૬૭॥

અરિગણ્ડાદિભયકૃદ્યન્ત્રોદ્ધાહિજનાર્ચિતા ।
કાલકણ્ઠસ્નુષા કાલકેશા કાલભયઙ્કરી ॥ ૬૮॥

અજાવાહા ચાજામિત્રા ચાજાસુરહરા હ્યજા ।
અજામુખીસુતારાતિપૂજિતા ચાજરાઽમરા ॥ ૬૯॥

આજાનપાવનાઽદ્વૈતા આસમુદ્રક્ષિતીશ્વરી ।
આસેતુહિમશૈલાર્ચ્યા આકુઞ્ચિત શિરોરુહા ॥ ૭૦॥

આહારરસિકા ચાદ્યા આશ્ચર્યનિલયા તથા ।
આધારા ચ તથાઽઽધેયા તથાચાધેયવર્જિતા ॥ ૭૧॥

આનુપૂર્વીક્લૃપ્તરથા ચાશાપાલસુપૂજિતા ।
ઉમાસ્નુષા ઉમાસૂનુપ્રિયા ચોત્સવમોદિતા ॥ ૭૨॥

ઊર્ધ્વગા ઋદ્ધિદા ઋદ્ધા ઔષધીશાતિશાયિની ।
ઔપમ્યહીના ચૌત્સુક્યકરી ચૌદાર્યશાલિની ॥ ૭૩॥

શ્રીચક્રવાલાતપત્રા શ્રીવત્સાઙ્કિતભૂષણા ।
શ્રીકાન્તભાગિનેયેષ્ટા શ્રીમુખાબ્દાધિદેવતા ॥ ૭૪॥

ઇયં નારી વરનુતા પીનોન્નતકુચદ્વયા ।
શ્યામા યૌવનમધ્યસ્થા કા જાતા સા ગૃહાદૃતા ॥ ૭૫॥

એષા સમ્મોહિની દેવી પ્રિયલક્ષ્યા વરાશ્રિતા ।
કામાઽનુભુક્તા મૃગયાસક્તાઽઽવેદ્યા ગુહાશ્રિતા ॥ ૭૬॥

પુલિન્દવનિતાનીતા રહઃ કાન્તાનુસારિણી ।
નિશા ચાક્રીડિતાઽઽબોધ્યા નિર્નિદ્રા પુરુષાયિતા ॥ ૭૭॥

સ્વયંવૃતા સુદૃક્ સૂક્ષ્મા સુબ્રહ્મણ્યમનોહરા ।
પરિપૂર્ણાચલારૂઢા શબરાનુમતાઽનઘા ॥ ૭૮॥

ચન્દ્રકાન્તા ચન્દ્રમુખી ચન્દનાગરુચર્ચિતા ।
ચાટુપ્રિયોક્તિમુદિતા શ્રેયોદાત્રી વિચિન્તિતા ॥ ૭૯॥

મૂર્ધાસ્ફાટિપુરાધીશા મૂર્ધારૂઢપદામ્બુજા ।
મુક્તિદા મુદિતા મુગ્ધા મુહુર્ધ્યેયા મનોન્મની ॥ ૮૦॥

ચિત્રિતાત્મપ્રિયાકારા ચિદમ્બરવિહારિણી ।
ચતુર્વેદસ્વરારાવા ચિન્તનીયા ચિરન્તની ॥ ૮૧॥

કાર્તિકેયપ્રિયા કામસહજા કામિનીવૃતા ।
કાઞ્ચનાદ્રિસ્થિતા કાન્તિમતી સાધુવિચિન્તિતા ॥ ૮૨॥

નારાયણસમુદ્ભૂતા નાગરત્નવિભૂષણા ।
નારદોક્તપ્રિયોદન્તા નમ્યા કલ્યાણદાયિની ॥ ૮૩॥

નારદાભીષ્ટજનની નાકલોકનિવાસિની ।
નિત્યાનન્દા નિરતિશયા નામસાહસ્રપૂજિતા ॥ ૮૪॥

પિતામહેષ્ટદા પીતા પીતામ્બરસમુદ્ભવા ।
પીતામ્બરોજ્જ્વલા પીનનિતમ્બા પ્રાર્થિતા પરા ॥ ૮૫॥

ગણ્યા ગણેશ્વરી ગમ્યા ગહનસ્થા ગજપ્રિયા ।
ગજારૂઢા ગજગતિઃ ગજાનનવિનોદિની ॥ ૮૬॥

અગજાનનપદ્માર્કા ગજાનનસુધાકરા ।
ગન્ધર્વવન્દ્યા ગન્ધર્વતન્ત્રા ગન્ધવિનોદિની ॥ ૮૭॥

ગાન્ધર્વોદ્વાહિતા ગીતા ગાયત્રી ગાનતત્પરા ।
ગતિર્ગહનસમ્ભૂતા ગાઢાશ્લિષ્ટશિવાત્મજા ॥ ૮૮॥

ગૂઢા ગૂઢચરા ગુહ્યા ગુહ્યકેષ્ટા ગુહાશ્રિતા ।
ગુરુપ્રિયા ગુરુસ્તુત્ય ગુણ્યા ગુણિગણાશ્રિતા ॥ ૮૯॥

ગુણગણ્યા ગૂઢરતિઃ ગીર્ગીર્વિનુતવૈભવા ।
ગીર્વાણી ગીતમહિમા ગીર્વાણેશ્વરસન્નુતા ॥ ૯૦॥

ગીર્વાણાદ્રિકૃતાવાસા ગજવલ્લી ગજાશ્રિતા ।
ગાઙ્ગેયવનિતા ગઙ્ગાસૂનુકાન્તા ગિરીશ્વરી ॥ ૯૧॥

દેવસેનાસપત્ની યા દેવેન્દ્રાનુજસમ્ભવા ।
દેવરેભભયાવિષ્ટા સરસ્તીરલુઠદ્ગતિઃ ॥ ૯૨॥

વૃદ્ધવેષગુહાક્લિષ્ટા ભીતા સર્વાઙ્ગસુન્દરી ।
નિશાસમાનકબરી નિશાકરસમાનના ॥ ૯૩॥

નિર્નિદ્રિતાક્ષિકમલા નિષ્ઠ્યૂતારુણભાધરા ।
શિવાચાર્યસતી શીતા શીતલા શીતલેક્ષણા ॥ ૯૪॥

કિમેતદિતિ સાશઙ્કભટા ધમ્મિલ્લમાર્ગિતા ।
ધમ્મિલ્લસુન્દરી ધર્ત્રી ધાત્રી ધાતૃવિમોચિની ॥ ૯૫॥

ધનદા ધનદપ્રીતા ધનેશી ધનદેશ્વરી ।

ધન્યા ધ્યાનપરા ધારા ધરાધારા ધરાધરા ॥ ૯૬॥

ધરા ધરાધરોદ્ભૂતા ધીરા ધીરસમર્ચિતા ।
કિં કરોષીતિ સમ્પૃષ્ટગુહા સાકૂતભાષિણી ॥ ૯૭॥

રહો ભવતુ તદ્ભૂયાત્ શમિત્યુક્તપ્રિયા સ્મિતા ।
કુમારજ્ઞાત કાઠિન્યકુચાઽર્ધોરુલસત્કટી ॥ ૯૮॥

કઞ્ચુકી કઞ્ચુકાચ્છન્ના કાઞ્ચીપટ્ટપરિષ્કૃતા ।
વ્યત્યસ્તકચ્છા વિન્યસ્તદક્ષિણાંસાંશુકાઽતુલા ॥ ૯૯॥

બન્ધોત્સુકિતકાન્તાન્તા પુરુષાયિતકૌતુકા ।
પૂતા પૂતવતી પૃષ્ટા પૂતનારિસમર્ચિતા ॥ ૧૦૦॥

કણ્ટકોપાનહોન્નૃત્યદ્ભક્તા દણ્ડાટ્ટહાસિની ।
આકાશનિલયા ચાકાશા આકાશાયિતમધ્યમા ॥ ૧૦૧॥

આલોલલોલાઽઽલોલા ચાલોલોત્સારિતાણ્ડજા ।
રમ્ભોરુયુગલા રમ્ભાપૂજિતા રતિરઞ્જની ॥ ૧૦૨॥

આરમ્ભવાદવિમુખા ચેલાક્ષેપપ્રિયાસહા ।
અન્યાસઙ્ગપ્રિયોદ્વિગ્ના અભિરામા હ્યનુત્તમા ॥ ૧૦૩॥

સત્વરા ત્વરિતા તુર્યા તારિણી તુરગાસના ।
હંસારૂઢા વ્યાઘ્રગતા સિંહારૂઢાઽઽરુણાધરા ॥ ૧૦૪॥

કૃત્તિકાવ્રતસમ્પ્રીતા કાર્તિકેયવિમોહિની ।
કરણ્ડમકુટા કામદોગ્ધ્રી કલ્પદ્રુસંસ્થિતા ॥ ૧૦૫॥

વાર્તાવ્યઙ્ગ્યવિનોદેષ્ટા વઞ્ચિતા વઞ્ચનપ્રિયા ।
સ્વાભાદીપ્તગુહા સ્વાભાબિમ્બિતેષ્ટા સ્વયઙ્ગ્રહા ॥ ૧૦૬॥

મૂર્ધાભિષિક્તવનિતા મરાલગતિરીશ્વરી ।
માનિની માનિતા માનહીના માતામહેડિતા ॥ ૧૦૭॥

મિતાક્ષરી મિતાહારા મિતવાદાઽમિતપ્રભા ।
મીનાક્ષી મુગ્ધહસના મુગ્ધા મૂર્તિમતી મતિઃ ॥ ૧૦૮॥

માતા માતૃસખાનન્દા મારવિદ્યાઽમૃતાક્ષરા ।
અપઞ્ચીકૃતભૂતેશી પઞ્ચીકૃત વસુન્ધરા ॥ ૧૦૯॥

વિફલીકૃતકલ્પદ્રુરફલીકૃતદાનવા ।
અનાદિષટ્કવિપુલા ચાદિષટ્કાઙ્ગમાલિની ॥ ૧૧૦ ।
નવકક્ષાયિતભટા નવવીરસમર્ચિતા ।
રાસક્રીડાપ્રિયા રાધાવિનુતા રાધેયવન્દિતા ॥ ૧૧૧॥

રાજચક્રધરા રાજ્ઞી રાજીવાક્ષસુતા રમા ।
રામા રામાદૃતા રમ્યા રામાનન્દા મનોરમા ॥ ૧૧૨॥

રહસ્યજ્ઞા રહોધ્યેયા રઙ્ગસ્થા રેણુકાપ્રિયા ।
રૈણુકેયનુતા રેવાવિહારા રોગનાશિની ॥ ૧૧૩॥

વિટઙ્કા વિગતાટઙ્કા વિટપાયિતષણ્મુખા ।
વીટિપ્રિયા વીરુડ્ધ્વજા વીરુટ્પ્રીતમૃગાવૃતા ॥ ૧૧૪॥

વીશારૂઢા વીશરત્નપ્રભાઽવિદિતવૈભવા ।
ચિત્રા ચિત્રરથા ચિત્રસેના ચિત્રિતવિગ્રહા ॥ ૧૧૫॥

ચિત્રસેનનુતા ચિત્રવસના ચિત્રિતા ચિતિઃ ।
ચિત્રગુપ્તાર્ચિતા ચાટુવચના ચારુભૂષણા ॥ ૧૧૬॥

ચમત્કૃતિશ્ચમત્કારભ્રમિતેષ્ટા ચલત્કચા ।
છાયાપતઙ્ગબિમ્બાસ્યા છવિનિર્જિતભાસ્કરા ॥ ૧૧૭॥

છત્રધ્વજાદિબિરુદા છાત્રહીના છવીશ્વરી ।
જનની જનકાનન્દા જાહ્નવીતનયપ્રિયા ॥ ૧૧૮॥

જાહ્નવીતીરગા જાનપદસ્થાઽજનિમારણા ।
જમ્ભભેદિસુતાનન્દા જમ્ભારિવિનુતા જયા ॥ ૧૧૯ ।
જયાવહા જયકરી જયશીલા જયપ્રદા ।
જિનહન્ત્રી જૈનહન્ત્રી જૈમિનીયપ્રકીર્તિતા ॥ ૧૨૦॥

જ્વરઘ્ની જ્વલિતા જ્વાલામાલા જાજ્વલ્યભૂષણા ।
જ્વાલામુખી જ્વલત્કેશા જ્વલદ્વલ્લીસમુદ્ભવા ॥ ૧૨૧॥

જ્વલત્કુણ્ડાન્તાવતરદ્ભક્તા જ્વલનભાજના ।
જ્વલનોદ્ધૂપિતામોદા જ્વલદ્દીપ્તધરાવૃતા ॥ ૧૨૨॥

જાજ્વલ્યમાના જયિની જિતામિત્રા જિતપ્રિયા ।
ચિન્તામણીશ્વરી છિન્નમસ્તા છેદિતદાનવા ॥ ૧૨૩॥

ખડ્ગધારોન્નટદ્દાસા ખડ્ગરાવણપૂજિતા ।
ખડ્ગસિદ્ધિપ્રદા ખેટહસ્તા ખેટવિહારિણી ॥ ૧૨૪॥

ખટ્વાઙ્ગધરજપ્રીતા ખાદિરાસન સંસ્થિતા ।
ખાદિની ખાદિતારાતિઃ ખનીશી ખનિદાયિની ॥ ૧૨૫॥

અઙ્કોલિતાન્તરગુહા અઙ્કુરદન્તપઙ્ક્તિકા ।
ન્યઙ્કૂદરસમુદ્ભૂતાઽભઙ્ગુરાપાઙ્ગવીક્ષણા ॥ ૧૨૬॥

પિતૃસ્વામિસખી પતિવરારૂઢા પતિવ્રતા ।
પ્રકાશિતા પરાદ્રિસ્થા જયન્તીપુરપાલિની ॥ ૧૨૭॥

ફલાદ્રિસ્થા ફલપ્રીતા પાણ્ડ્યભૂપાલવન્દિતા ।
અફલા સફલા ફાલદૃક્કુમારતપઃફલા ॥ ૧૨૮॥

કુમારકોષ્ઠગા કુન્તશક્તિચિહ્નધરાવૃતા ।
સ્મરબાણાયિતાલોકા સ્મરવિદ્યોહિતાકૃતિઃ ॥ ૧૨૯॥

કાલમેઘાયિતકચા કામસૌભાગ્ય વારિધિઃ ।
કાન્તાલકાન્તા કામેડ્યા કરકોન્નર્તન પ્રિયા ॥ ૧૩૦॥

પૌનઃ પુન્યપ્રિયાલાયા પમ્પાવાદ્યપ્રિયાધિકા ।
રમણીયા સ્મરણીયા ભજનીયા પરાત્પરા ॥ ૧૩૧॥

નીલવાજિગતા નીલખડ્ગા નીલાંશુકાઽનિલા ।
રાત્રિર્નિદ્રા ભગવતી નિદ્રાકર્ત્રી વિભાવરી ॥ ૧૩૨॥

શુકાયમાનકાયોક્તિઃ કિંશુકાભાધરામ્બરા ।
શુકમાનિતચિદ્રૂપા સંશુકાન્તપ્રસાધિની ॥ ૧૩૩॥

ગૂઢોક્તા ગૂઢગદિતા ગુહસઙ્કેતિતાઽગગા ।
ધૈર્યા ધૈર્યવતી ધાત્રીપ્રેષિતાઽવાપ્તકામના ॥ ૧૩૪॥

સન્દૃષ્ટા કુક્કુટારાવધ્વસ્તધમ્મિલ્લજીવિની ।
ભદ્રા ભદ્રપ્રદા ભક્તવત્સલા ભદ્રદાયિની ॥ ૧૩૫॥

ભાનુકોટિપ્રતીકાશા ચન્દ્રકોટિસુશીતલા ।
જ્વલનાન્તઃસ્થિતા ભક્તવિનુતા ભાસ્કરેડિતા ॥ ૧૩૬॥

અભઙ્ગુરા ભારહીના ભારતી ભારતીડિતા ।
ભરતેડ્યા ભારતેશી ભુવનેશી ભયાપહા ॥ ૧૩૭॥

ભૈરવી ભૈરવીસેવ્યા ભોક્ત્રી ભોગીન્દ્રસેવિતા ।
ભોગેડિતા ભોગકરી ભેરુણ્ડા ભગમાલિની ॥ ૧૩૮॥

ભગારાધ્યા ભાગવતપ્રગીતાઽભેદવાદિની ।
અન્યાઽનન્યા નિજાનન્યા સ્વાનન્યાઽનન્યકામિની ॥ ૧૩૯॥

યજ્ઞેશ્વરી યાગશીલા યજ્ઞોદ્ગીતગુહાનુગા ।
સુબ્રહ્મણ્યગાનરતા સુબ્રહ્મણ્યસુખાસ્પદા ॥ ૧૪૦॥

કુમ્ભજેડ્યા કુતુકિતા કૌસુમ્ભામ્બરમણ્ડિતા ।
સંસ્કૃતા સંસ્કૃતારાવા સર્વાવયવસુન્દરી ॥ ૧૪૧॥

ભૂતેશી ભૂતિદા ભૂતિઃ ભૂતાવેશનિવારિણી ।
ભૂષણાયિતભૂતાણ્ડા ભૂચક્રા ભૂધરાશ્રિતા ॥ ૧૪૨॥

ભૂલોકદેવતા ભૂમા ભૂમિદા ભૂમિકન્યકા ।
ભૂસુરેડ્યા ભૂસુરારિવિમુખા ભાનુબિમ્બગા ॥ ૧૪૩॥

પુરાતનાઽભૂતપૂર્વાઽવિજાતીયાઽધુનાતના ।
અપરા સ્વગતાભેદા સજાતીયવિભેદિની ॥ ૧૪૪॥

અનન્તરાઽરવિન્દાભા હૃદ્યા હૃદયસંસ્થિતા ।
હ્રીમતી હૃદયાસક્તા હૃષ્ટા હૃન્મોહભાસ્કરા ॥ ૧૪૫॥

હારિણી હરિણી હારા હારાયિતવિલાસિની ।
હરારાવપ્રમુદિતા હીરદા હીરભૂષણા ॥ ૧૪૬॥

હીરભૃદ્વિનુતા હેમા હેમાચલનિવાસિની ।
હોમપ્રિયા હૌત્રપરા હુઙ્કારા હુમ્ફડુજ્જ્વલા ॥ ૧૪૭॥

હુતાશનેડિતા હેલામુદિતા હેમભૂષણા ।
જ્ઞાનેશ્વરી જ્ઞાતતત્ત્વા જ્ઞેયા જ્ઞેયવિવર્જિતા ॥ ૧૪૮॥

જ્ઞાનં જ્ઞાનાકૃતિર્જ્ઞાનિવિનુતા જ્ઞાતિવર્જિતા ।
જ્ઞાતાખિલા જ્ઞાનદાત્રી જ્ઞાતાજ્ઞાતવિવર્જિતા ॥ ૧૪૯॥

જ્ઞેયાનન્યા જ્ઞેયગુહા વિજ્ઞેયાઽજ્ઞેયવર્જિતા ।
આજ્ઞાકરી પરાજ્ઞાતા પ્રાજ્ઞા પ્રજ્ઞાવશેષિતા ॥ ૧૫૦॥

સ્વાજ્ઞાધીનામરાઽનુજ્ઞાકાઙ્ક્ષોન્નૃત્યત્સુરાઙ્ગના ।

સગજા અગજાનન્દા સગુહા અગુહાન્તરા ॥ ૧૫૧॥

સાધારા ચ નિરાધારા ભૂધરસ્થાઽતિભૂધરા ।
સગુણા ચાગુણાકારા નિર્ગુણા ચ ગુણાધિકા ॥ ૧૫૨॥

અશેષા ચાવિશેષેડ્યા શુભદા ચાશુભાપહા ।
અતર્ક્યા વ્યાકૃતા ન્યાયકોવિદા તત્ત્વબોધિની ॥ ૧૫૩॥

સાઙ્ખ્યોક્તા કપિલાનન્દા વૈશેષિકવિનિશ્ચિતા ।
પુરાણપ્રથિતાઽપારકરુણા વાક્પ્રદાયિની ॥ ૧૫૪॥

સઙ્ખ્યાવિહીનાઽસઙ્ખ્યેયા સુસ્મૃતા વિસ્મૃતાપહા ।
વીરબાહુનુતા વીરકેસરીડિતવૈભવા ॥ ૧૫૫॥

વીરમાહેન્દ્રવિનુતા વીરમાહેશ્વરાર્ચિતા ।
વીરરાક્ષસસમ્પૂજ્યા વીરમાર્તણ્ડવન્દિતા ॥ ૧૫૬॥

વીરાન્તકસ્તુતા વીરપુરન્દરસમર્ચિતા ।
વીરધીરાર્ચિતપદા નવવીરસમાશ્રિતા ॥ ૧૫૭॥

ભૈરવાષ્ટકસંસેવ્યા બ્રહ્માદ્યષ્ટકસેવિતા ।
ઇન્દ્રાદ્યષ્ટકસમ્પૂજ્યા વજ્રાદ્યાયુધશોભિતા ॥ ૧૫૮॥

અઙ્ગાવરણસંયુક્તા ચાનઙ્ગામૃતવર્ષિણી ।
તમોહન્ત્રી તપોલભ્યા તમાલરુચિરાઽબલા ॥ ૧૫૯॥

સાનન્દા સહજાનન્દા ગુહાનન્દવિવર્ધિની ।
પરાનન્દા શિવાનન્દા સચ્ચિદાનન્દરૂપિણી ॥ ૧૬૦॥

પુત્રદા વસુદા સૌખ્યદાત્રી સર્વાર્થદાયિની ।
યોગારૂઢા યોગિવન્દ્યા યોગદા ગુહયોગિની ॥ ૧૬૧॥

પ્રમદા પ્રમદાકારા પ્રમાદાત્રી પ્રમામયી ।
ભ્રમાપહા ભ્રામયિત્રી પ્રધાના પ્રબલા પ્રમા ॥ ૧૬૨॥

પ્રશાન્તા પ્રમિતાનન્દા પરમાનન્દનિર્ભરા ।
પારાવારા પરોત્કર્ષા પાર્વતીતનયપ્રિયા ॥ ૧૬૩॥

પ્રસાધિતા પ્રસન્નાસ્યા પ્રાણાયામપરાર્ચિતા ।
પૂજિતા સાધુવિનુતા સુરસાસ્વાદિતા સુધા ॥ ૧૬૪॥

સ્વામિની સ્વામિવનિતા સમનીસ્થા સમાનિતા ।
સર્વસમ્મોહિની વિશ્વજનની શક્તિરૂપિણી ॥ ૧૬૫॥

કુમારદક્ષિણોત્સઙ્ગવાસિની ભોગમોક્ષદા ॥ ૐ ।
એવં નામસહસ્રં તે પ્રોક્તં નારદ શોભનમ્ ॥ ૧૬૬॥

સુબ્રહ્મણ્યસ્ય કાન્તાયા વલ્લીદેવ્યાઃ પ્રિયઙ્કરમ્ ।
નિત્યં સઙ્કીર્તયેદેતત્સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૬૭॥

શુક્રવારે ભૌમવારે ષષ્ઠ્યાં વા કૃત્તિકાસ્વપિ ।
સઙ્ક્રમાદિષુ કાલેષુ ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૧૬૮॥

પઠેદિદં વિશેષેણ સર્વસિદ્ધિમવાપ્નુયાત્ ।
એભિર્નામભિરમ્બાં યઃ કુઙ્કુમાદિભિરર્ચયેત્ ॥ ૧૬૯॥

યદ્યદ્વાઞ્છતિ તત્સર્વમચિરાજ્જાયતે ધ્રુવમ્ ।
સુબ્રહ્મણ્યોઽપિ સતતં પ્રીતઃ સર્વાર્થદો ભવેત્ ॥ ૧૭૦॥

પુત્રપૌત્રાદિદં સર્વસમ્પત્પ્રદ મઘાપહમ્ ।
વિદ્યાપ્રદં વિશેષેણ સર્વરોગનિવર્તકમ્ ॥ ૧૭૧॥

દુષ્ટારિષ્ટપ્રશમનં ગ્રહશાન્તિકરં વરમ્ ।
જપાદસ્ય પ્રભાવેણ સર્વાઃ સિદ્ધ્યન્તિ સિદ્ધયઃ ।
ગોપનીયં પઠ ત્વં ચ સર્વમાપ્નુહિ નારદ ॥ ૧૭૨॥

॥ સ્કાન્દે શઙ્કરસંહિતાતઃ ॥

From Bhagavati Stutimanjari (Mahaperiyaval Trust)
Encoded and proofread by Sunder Hattangadi

*Shri Valli Sahasranama Stotra*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*